यत्प्रतापो रिपुस्त्रीणां सनेत्राम्भोऽभजन्मुखम् ॥”
यथा, वैद्यकचक्रपाणिसंग्रहे तृष्णाधिकारे ।
“काश्मर्य्यशर्करायुक्तं चन्दनोशीरपद्मकम् ।
द्राक्षामधुकसंयुक्तं पित्ततर्षे जलं पिबेत् ॥”
तीर्य्यतेऽनेनेति । तॄ प्लवनतरणयोः+“इतृ-
वदिहनीति ।” उणां ३ । ६२ । इति सः । )
प्लवः । (तीर्य्यतेऽसौ इति कर्म्मणि सः ।) समुद्रः ।
इत्युणादिकोषः ॥ सूर्य्यः । इति संक्षिप्तसारे
उणादिवृत्तिः ॥

तर्षणं, क्ली, ( तृष+भावे ल्युट् । ) पिपासा ।
इति जटाधरः ॥ ( अभिलाषः । यथा, भाग-
वते । ३ । २५ । ७ ।
“निर्व्विण्णा नितरां भूमन्नसदिन्द्रियतर्षणात् ।
येन संभाव्यमानेन प्रपन्नान्धं तमः प्रभो ! ॥”)

तर्षितः, त्रि, (तर्षोऽस्य जातः । तर्ष+तारकादि-
त्वात् इतच् । ) तृषितः । इति त्रिकाण्ड-
शेषः ॥ ( यथा, भागवते । ६ । ६ । २७ ।
“राजा तदृयज्ञसदनं प्रविष्टो निशि तर्षितः ।
दृष्ट्वा शयानान् विप्रांस्तान् पपौ मन्त्रजलं
स्वयम् ॥”
जाताभिलाषः । यथा, रामायणे ।२।१०४।१ ।
“वशिष्ठः पुरतः कृत्वा दारान् दशरथस्य च ।
अभिचक्राम तं देशं रामदर्शनतर्षितः ॥”)

तल, गतौ । ( भ्वां-परं-सकं-सेट् । ) सौत्रधातु-
रयम् । तालिश्यः । इति दुर्गादासः ॥

तल, कि प्रतिष्ठितौ । इति कविकल्पद्रुमः ॥ (चुरां-
पक्षे भ्वां-परं-अकं-सेट् ।) कि, तालयति तलति
व्रतम् । संपूर्णं स्यादित्यर्थः । इति दुर्गादासः ॥

तलं, क्ली पुं, ( तलतीति । तल प्रतिष्ठायाम्+
पचाद्यच् । ) स्वरूपम् । यथा महीतलम् ।
( यथाच माघे । २ । १११ ।
“कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदम् ।
विदाङ्कुर्व्वन्तु महतस्तलं विद्विषदम्भसः ॥”
“तलं स्वरूपं प्रमाणमिति यावत् ॥” इति
तट्टीकायां मल्लिनाथः ॥) अनूर्द्ध्वम् । इति मेदिनी ।
ले, २१ ॥ (अधः । इत्यमरः । ३ । ३ । २०१ ॥
यथा, मनुः । २ । ५९ ।
“अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते ॥”
यथा च शान्तिशतके । २ । १६ ।
“वासो वल्कलमास्तरः किशलयान्योक-
स्तरूणां तलं
मूलानि क्षतये क्षुधां गिरिनदीतोयं
तृषाशान्तये ॥”
हस्तादीनामुपरिभागः । यथा,—
“तलं प्रत्यङ्गुलीनां यः कण्डरा बाहुपृष्ठतः ।
बाह्वोः कर्म्मक्षयकरी———————॥”
इति माधवकृतरुग्विनिश्चये वातव्याधौ ॥
“तलं हस्तस्योपरिभागः तलशब्दोऽत्र उपरि-
वचनः यथा भूतलमिति गयदासः । तेनाय-
मर्थः, बाह्वोः पृष्ठं बाहुपृष्ठं तत आरभ्य हस्त-
तलं यावदित्यर्थः ॥” इति विजयरक्षितकृत-
व्याख्यानम् ॥ )

तलं, क्ली, ( तलतीति । तल+अच् । ) ज्याघात-
वारणम् । ( यथा,—
“ततः समुत्पेतुरुदायुधास्ते
महीक्षितो बद्धतलाङ्गुलित्राः ॥”)
इति महाभारते । १ । १९० । १५ ।
काननम् । कार्य्यबीजम् । इति मेदिनी । ले,
२१ ॥ गर्त्तः । इति त्रिकाण्डशेषः ॥ पादतलस्य
मध्यम् । इति हेमचन्द्रः । ३ । २८२ ॥ ( यथा,
भागवते । ८ । २० । २३ ।
“रसामचष्टाङ्घ्रितलेऽथ पादयो-
र्म्महीं महीध्रान् पुरुषस्य जङ्घयोः ।
पतत्त्रिणो जानुनि विश्वमूर्त्ते-
रूर्व्वोर्गणं मारुतमिन्द्रसेनः ॥”
हस्तस्य मध्यमपि । यथा, मनुः । ४ । १४३ ।
“स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् ।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु ॥”)

तलः, पुं, तालवृक्षः । चपेटः । ( यथा, मार्क-
ण्डेये । ९० । १६ ।
“स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।
देव्यास्तच्चापि सा देवी तलेनोरस्यताडयत् ॥”
करतलाघातजन्यशब्दः । यथा, महाभारते ।
३ । २७७ । २४ ।
ततः प्रहसिताः सर्व्वे तेऽन्योन्यस्य तलान् ददुः ॥”)
त्सरुः । सव्यपाणिना तन्त्रीघातः । इति मेदिनी ।
ले, २१ ॥ स्वभावः । आधारः । इति हेम-
चन्द्रः ॥ महादेवः । यथा, महाभारते शिव-
सहस्रनामस्तोत्रे । १३ । १७ । १२८ ।
“तलस्तालः करस्थाली ऊर्द्ध्वसंहननो महान् ॥”)

तलकं, क्ली, ( तलेन गभीरगर्त्तेन कायतीति ।
कै+कः । ) पुष्करिणी । इति हारावली ।४२॥
तलाओ इति हिन्दी भाषा ॥

तलप्रहारः, पुं, (तलेन पाणितलेन प्रहारो यस्य ।)
चपेटः । तत्पर्य्यायः । चर्व्वा २ । इति हारा-
वली । १६७ ॥ ( यथा, मार्कण्डेये । ९० । १७ ।
“तलप्रहाराभिहतो निपपात महीतले ॥
तलस्य प्रहारः । ) तलाघातः ॥

तलसारकं, क्ली, ( तले सारो यस्य कप् । )
घोटकस्याश्वभोजनपात्रम् । इति केचित् ॥
घोटकस्य वक्षःस्थलबन्धनरज्जुः । तत्पर्य्यायः ।
वक्रपट्टः २ तलिका ३ । इति हेमचन्द्रः । ४ ।
३१७ ॥

तलहृदयं, क्ली, ( तलस्य पादतलस्य हृदयमिव ।)
पादतलस्य मध्यम् । इति हेमचन्द्रः ।३।२८२ ॥

तला, स्त्री, ( तल+स्त्रियां टाप् । ) गोधा ।
ज्याघातवारणा । इत्यमरः । २ । ८ । ८४ ।

तलाची, स्त्री, ( तलमञ्चतीति । अन्च+क्विप् ।
स्त्रियां ङीष् ।) नलनिर्म्मितकटः । इति हारा-
वली । १७७ ॥

तलातलं, क्ली, ( नास्ति तलं यस्येति अतलम् ।
तलादपि अतलम् अत्यन्तनिम्नतयास्य तथा-
त्वम् । ) पातालविशेषः । इति शब्दमाला ॥
तत्र मयनामा दानवेन्द्रस्त्रिपुराधिपतिर्भगवता
त्रिपुरारिणा त्रिलोक्याः शं चिकीर्षुणा निर्दग्ध-
स्वपुरत्रयस्तत्प्रसादात् लब्धपदो मायाविनामा-
चार्य्यो महादेवेन परिरक्षितो विगतसुदर्शन-
भयो महीयते ।” इति श्रीभागवतम् ॥

तलिका, स्त्री, ( तलं वक्षसोऽधोभागो बन्धनस्थान-
त्वेनास्त्यस्या इति । तल+ठन् ।) तलसारकम् ।
इति हेमचन्द्रः । ४ । ३१७ ॥

तलितं, क्ली, भृष्टमांसम् । यथा,—
“शुद्धमांसावधानेन मांसं सम्यक् प्रसाधितम् ।
पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः ॥”
अस्य गुणाः । यथा, भावप्रकाशे । १ । १ ।
“तलितं बलमेधाग्निमांसौजःशुक्रवृद्धिकृत् ।
तर्पणं लघु सुस्निग्धं रोचनं दृढ़ताकरम् ॥”

तलिनं, क्ली, (तल्यते शयनार्थं गम्यतेऽत्र । तल+
“तलिपुलिभ्यां च ।” उणां । २ । ५३ । इति
इनन् । ) शय्या । इति हारावली । १७२ ॥

तलिनः, त्रि, ( तल+इनन् ।) विरलः । स्तोकः ।
स्वच्छः । इति मेदिनी । ने, ७० ॥ दुर्ब्बलः ।
इति हेमचन्द्रः ॥

तलिमं, क्ली,(तल+बाहुलकात् इमन् ।) कुट्टिमम् ।
तल्पम् । चन्द्रहासः । वितानकः ॥ इति मेदिनी ।
मे, ४४ ॥

तलुनः, पुं, (तरति वेगेन गच्छतीति । तॄ+“चोरुष
ला वा ।” उणां । ३ । ५४ । इति उनन् रस्य
लश्च ।) पवनः । युवा । इति मेदिनी । ने, ७० ॥

तलुनी, स्त्री, ( तलुन+गौरादित्वात् ङीष् । )
तरुणी । युवती । इति शब्दरत्नावली ॥

तलेक्षणः, पुं, (तले अधोभागे ईक्षणं दृष्टिरस्य ।)
शूकरः । इति शब्दार्थकल्पतरुः ॥

तलोदरी, स्त्री, ( तलमतिगभीरमपूर्य्यतयेतिभावः
उदरं यस्याः । बहुचकत्वेऽपि “नासिकोदरौष्ठ-
जङ्घादन्तकर्णशृङ्गाच्च ।” ४ । १ । ५५ । इति
ङीष् । बह्वचयोर्मध्ये ङीष्लक्षणो निषेधो बाध्यते
पुरस्तादपवादन्यायात् ।) भार्य्या । इति शब्दार्थ-
कल्पतरुः ॥

तलोदा, स्त्री, ( तले उदकं यस्याः । उदकशब्द-
स्योदादेशश्च । ) नदी । इति त्रिकाण्डशेषः ॥

तल्कं, क्ली, ( तल्+बाहुलकात् कन् । ) वनम् ।
इति त्रिकाण्डशेषः ॥

तल्पं, क्ली पुं, (तल्यते शयनार्थं गम्यतेऽत्र । तल+
“खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः ।” उणां ।
३ । २८ । इति पप्रत्ययेन निपातनात् साधुः ।)
शय्या । (यथा, मनुः । ३ । ३ ।
“स्रग्विणं तल्प आसीनमर्हयेत् प्रथमं गवा ॥”)
अट्टालिका । दाराः । इत्यमरभरतौ ॥ (यथा,
सम्बर्त्तसंहितायाम् । १५८ ।
“पितृव्यदारगमने भ्रातृभार्य्यागमे तथा ।
गुरुतल्पव्रतं कुर्य्यात् नान्या निष्कृतिरुच्यते ॥”)

तल्पकीटः, पुं, ( तल्पे शय्यायां जातः कीटः ।)
कीटविशेषः । छारपोका इति भाषा । यथा,
“अन्नैकं तल्पकीटश्च तदा शूद्रो भवेद्ध्रुवम् ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ॥